वर्षः-पातः ( a d. shower ). **-Drizzly,** *a.* शीकरयुक्त, तुषारविशिष्ट.

**Droll,** *s.* भंडः, वैहासिकः, विदूषकः. *-a.* हासकर ( री *f.* ), उपहास्य, विनोदिन्, असंबद्ध. *-v. i.* परिहासं उत्पद् c. **-ery,** *s.* परिहासः, हास्यं, विहासः, विनोदः, नर्मालापः.

**Dromedary,** *s.* क्रमेलः-लकः, एकककुद् *m.*

**Drone,** *s.* ( **dronish** ) अलसः, निरुद्योगः; आलस्यशीलः, तंद्रालुः, निरुत्साहः.

**Droop,** *v. t.* अवनम् c. ( नमयति ); नम्रीकृ 8 U; *See* **Bend.** *-v. i.* अव-वि-सद् 1 P, म्लै 1 P, ग्लै 1 P, स्रंस् 1 A, गल् 1 P, क्लम् 1, 4 P; ध्वंस् 1 A, क्षि-मुच्-pass., शिथिलीभू 1 P, अव-आ-नम् 1 P; 'let not your spirits d. ( flag ) ' मा भवानंगानि मुंचतु ( V. 2 ); ' I slept with d. ing limbs ' मुक्तैरवयवैरशायिषि ( D. K. II. 2 ); ' the vine is d. ing with its load ' फलभारानमिता द्राक्षालता; ' the whole frame d. s down ' स्रंसते देहबंधः ( U. 3). **-ing,** *a.* अवसन्न, म्लान, क्लांत, स्रस्त, शिथिल, संसिन. **2** आ-अव-नत, आवर्जित, नम्रीभूत, नमित.

**Drop,** *s.* बिंदु, *m.*, पृषत् *n.* लवः, विप्रुष् *f.*, पृषतः, कणिका, कणः, शीकरः; ' d. by d. ' बिंदुक्रमेण, कणशः; ' small d. s make a pool' जलबिंदुनिपातेन क्रमशः पूर्यते घटः. ( H. 2 ). **2** कर्णावतंसः; लोलकः, कुंडलं. *-v. t.* कणशः स्रु c. or पत् c. or स्यंद् c.; ' d. ing rut ' मदं क्षरंतः, मदनिस्यंदिनः ( गजाः ) ' d ing. nectar ' अमृतस्रुत्, सुधास्यंदिन्. **2** अव-, नि पत् c., स्रंस् c., भ्रंश् c., च्यु c., मुच् 6 P, विसृज् 6 P, निविश् c. **3** सं-हृ 1 P, अपास् 4 P, त्यज् 1 P, निवृत् 1 A, ( with abl. ); ' I shall d. congratulatory lines regarding you in my letters ' मदीयेषु लेखेषु त्वामुद्दिश्य सभाजनाक्षराणि पातयिष्यामि ( M. 5 ); ' let this matter ( story ) be d. ed ' संह्रियतामियं कथा (Ka. 169). *-v. i.* स्रु 1 P, च्युत्-श्च्युत् 1 P, क्षर् 1 P, गल् 1 P, स्यंद् 1 A. **2** स्रंस्-च्यु-1 A, भ्रंश् 1 A, 4 P; नि-,पत्, ' d. ing on his knees' जानुभ्यामवनौ गत्वा, क्षितितलनिहितजानुः. **3** नि-,अव-, पत् 1 P, अवसद् 1 P, मूर्छ् 1 P, *See* **Droop**; ' I feel ready to d.' अवसन्नप्रायाणि मे गात्राणि, सीदंति मे अंगानि. **4** ( in ) सहसा-अतर्कितं-गम् 1 P or आगम्.

**Dropsy,** *s.* ( generally ) शोफः, शोथः. **2** जलोदरं, जठरामयः, उदरी ; ' dropsied honour ' केवलं स्थूलः-महाप्रमाणः-मानः.

**Dross,** *s.* मंडूरं, सिंहाणं ( नं ), लोहमलं, सिंघाणं. **2** मलं, खलं, किट्टं; *See* **Dregs.** **-y,** *a.* समल.

**Drought,** *s.* अवग्र( ग्रा )हः, अनावृष्टि *f.*, अवर्षणं, जलशोषः, वृष्टिविघातः. वर्षनिरोधः. **-y,** *a.* जलशून्य, शुष्क, निरुदक, निर्वृष्टि.

**Drove,** *s.* *See* under **Drive.**

**Drown,** *v. t.* प्लु c.; आ सं-परि प्लु c. **2** जले निमस्ज् c., ( मज्जयति ) or प्रविश् c. **3** जलमज्जनेन व्यापद् c. or मृ c. **4** तिरोधा 3 U, तिरयति (D.) ' d. s my voice with his cries ' केकाभिस्तिरयति मे वचनं (Mal. 9 ) *-v. i.*, ' to be d. ed ' नि-मस्ज् 6 P, निमज्जनेन मृ 6 A, or नश् 4 P or व्यापद् 4 A; ' d. ed in the sea ' पयोराशौ निमग्न; ' d. ed in reflection' चिंतामग्न. **-ing,** *s.* मज्जनं, आप्लावः, प्लावनं.

**Drowse,** *v. i.* नि-द्रा 2 P. स्वप् 2 P, स्वप् desid. (सुषुप्सति). **-Drowsy,** *a.* निद्रालु, तंद्रिल, निद्रालस, निद्राशील, अलस. **-ness,** *s.* तंद्रा, निद्रालुत्वं, आलस्यं, निद्रा, निद्राशीलत्वं, शयालुता.

**Drub,** *v. t.* वेत्रेण तड् 10 or प्र-हृ 1 P,

**Drudge,** *v. i.* अविरतं-अतिक्लेशेन-आयस् 1, 4 P or परिश्रमं कृ 8 U, शरीरायासेन व्रातं कृ. *-s.* व्रातीनः, अविरतायासिन् *m.*, अतिक्लेशेन निकृष्टकर्मकारिन् *m.*, हीनवृत्ति *m.* **-ry,** *s.* अविरतायासः, शरीरक्लेशः, नित्यश्रमः, नित्यक्लेशः. निकृष्टकर्माभियोगः, व्रातं.

**Drug,** *s.* औषधं, भेषजं, अगदः, भैषज्यं, जायु *m.* *-v. t.* औषधादिना मिश्र् 10 or संसृज् 6 P. **-Druggist,** *s.* औषधविक्रयिन् *m.*, भेषजकारः.

**Drugget,** *s.* स्थूलपटः, स्थूलशाटकः, वराशि *m.*

**Drum,** *s.* पटहः *m.*, दुंदुभि *m.* डिंडिमः, भेरी, आनकः. **2** कर्णोदरं, कर्णदुंदुभि *m.* *-v. i.* पटहं तड् 10. **2** स्पंद् 1 A. **-mer,** *s.* पटहताडकः. **-Drumstick,** *s.* कोणः, शारिका.

**Dry,** ( up ) *v. i.* शुष् 4 P, शोषं या 2 P or गम् 1 P, आर्द्रै 1 A, नीरसीभू 1 P, शुष्कीभू. *-v. t.* शुष् c., शोषं नी 1 P, आर्द्रै c., रसं अपनी or हृ 1 P, शुष्कीकृ 8 U; ' she dried rice in the sun ' तंडुलान्सूर्यातपे दत्तवती. **2** ( up ) आचम् 1 P, ( आचामति स्वेदलवान् मुखे ते R. XIII. 20); उच्छुष् c., आ-नि-पा 1 P. *-a.* शुष्क, निर्जल, नीरस, अक्लिन्न, वान. **2** असार, निःसार, निःसत्व, अरस, नीरस, फल्गु, विरस, तुच्छ. **3** उदकार्थिन्, तृषित, तृषार्त; ' d. soil ' मरु *m.*, मरुस्थलं-ली; ' d. ground ' स्थलं; ' d.-eyed ' निरश्रुनयन; ' d. nurse ' शिशुपालिका, अंकपाली; ' d. shod ' शुष्कचरण *a.* **-er,** *s.* शोषकः-णः. **-ing,** *s.* शोषः, शोषणं, शुष्कीकरणं. **-ly,** *adv.* शुष्कं, नीरसं, अरसिकतया. **-ness,** *s.* शोषः, शुष्कता, निर्जलत्वं, अरसिकत्वं.

**Dryad,** *s.* वनदेवता.